# Vedapurushaproktam Shivalingarchanopadesham

# વેદપુરુષપ્રોક્તં શિવલિઙ્ગાર્ચનોપદેશમ્

## Document Information

Text title : Vedapurushaproktam Shivalingarchanopadesham

File name : vedapuruShaproktaMshivalingArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 24| 420-444||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વેદપુરુષપ્રોક્તં શિવલિઙ્ગાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

વેદપુરુષઃ

શિવલિઙ્ગસ્વરૂપસ્ય શિવસ્ય પરમાત્મનઃ ।
કર્તવ્યમર્ચનં ભક્ત્યા ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૪૨૦॥

બ્રાહ્મણ્યમપિ સમ્પ્રાપ્ય યો નાર્ચયતિ શઙ્કરમ્ ।
સ દુર્ભગ ઇતિ જ્ઞેયો બ્રાહ્મણૈર્વેદવિત્તમૈઃ ॥ ૪૨૧॥

યેન તપ્તં તપઃ પૂર્વમઘઘ્નં શઙ્કરાલયે ।
તસ્યૈવ ભવતિ શ્રદ્ધા શિવલિઙ્ગસમર્ચને ॥ ૪૨૨॥

યઃ કરિષ્યતિ યત્નેન શિવલિઙ્ગે શિવાર્ચનમ્ ।
સ સાક્ષાચ્છઙ્કરં સામ્બં સમર્ચયતિ સર્વથા ॥ ૪૨૩॥

લિઙ્ગે સમર્ચિતઃ શમ્ભુર્દદાતિ વરમીપ્સિતમ્ ।
અતઃ પ્રયત્નતો નિત્યં કર્તવ્યં લિઙ્ગપૂજનમ્ ॥ ૪૨૪॥

ઉદ્ધૂલનં ત્રિપુણ્ડ્રં ચ તથા રુદ્રાક્ષધારણમ્ ।
કર્તવ્યમતિયત્નેન લિઙ્ગપૂજાપરૈર્દ્વિજૈઃ ॥ ૪૨૫॥

કર્તવ્યો લિઙ્ગપૂજાન્તે પઞ્ચાક્ષરજપો દ્વિજૈઃ ।
સહસ્રમપ્રમાદેન રુદ્રાધ્યાયજપસ્તતઃ ॥ ૪૨૬॥

રુદ્રાધ્યાયેન કર્તવ્યં શિવલિઙ્ગાભિષેચનમ્ ॥ ૪૨૭॥

બિલ્વપત્રૈઃ પૂજનીયં શિવલિઙ્ગં પ્રયત્નતઃ ।
અયં મે હસ્ત ઇત્યાદ્યૈઃ સવ્યસ્તતલેન યઃ ॥ ૪૨૮॥

ઉપસ્પૃશેલ્લિઙ્ગપાર્શ્વં સ પાપેભ્યો વિમુચ્યતે ।
પ્રદક્ષિણાષ્ટકં કાર્યમધિકં તુ શિવાલયે ॥ ૪૨૯॥

કૃતાઞ્જલિપુટૈરેવ શિવસ્મરણપૂર્વકમ્ ।

યાનિ કાનિ ચ પાપાનિ બ્રહ્મહત્યાદિકાનિ ચ ॥ ૪૩૦॥

તાનિ તાનિ વિનશ્યન્તિ પ્રદક્ષિણપદે પદે ।
ઉત્થાયોત્થાય સાષ્ટાઙ્ગાન્પ્રણામાન્ વિંશદુત્તમાન્ ॥ ૪૩૧॥

યઃ કરિષ્યતિ યત્નેન સ પાપેભ્યો વિમુચ્યતે ।
પ્રણમ્ય પરમેશાગ્રે કરતાડનપૂર્વકમ્ ॥ ૪૩૨॥

યો નૃત્યત્યન્વહં ભક્ત્યા સ પાપેભ્યો વિમુચ્યતે ।
વૃષસ્ય વૃષણં સ્પૃષ્ટ્વા વૃષશ‍ૃઙ્ગાન્તરાન્મુદા ॥ ૪૩૩॥

યઃ પશ્યેલ્લિઙ્ગમૈશાનં સ પાપેભ્યો વિમુચ્યતે ।
ભુવનત્રયતીર્થાનિ સર્વાણ્યપિ નિશામુખે ॥ ૪૩૪॥

વૃષાણ્ડં સમુપાશ્રિત્ય તિષ્ઠન્તિ મુનિસત્તમાઃ ।
વૃષાણ્ડં યઃ સ્પૃશેત્સાયં સ તીર્થાન્યખિલાન્યપિ ॥ ૪૩૫॥

સ્પૃષ્ટઃ સ્નાતશ્ચ સતતં પૂતશ્ચાત્ર ન સંશયઃ ।
દ્રષ્ટવ્યમૈશ્વરં લિઙ્ગં વૃષશ‍ૃઙ્ગાન્તરાદ્ દ્વિજાઃ ॥ ૪૩૬॥

વૃષેશવૃષણં સ્પૃષ્ટ્વા શિવસ્મરણપૂર્વકમ્ ।
પ્રદક્ષિણનમસ્કારાન્કૃત્વા દૃષ્ટ્વા ચ શઙ્કરમ્ ॥ ૪૩૭॥

પુનઃ પ્રદક્ષિણં કૃત્વા શિવલોકે મહીયતે ।
ઇમાનિ નિત્યં કાર્યાણિ ભસ્મધારણપૂર્વકમ્ ॥ ૪૩૮॥

શિવલિઙ્ગાર્ચનાદીનિ બ્રાહ્મણાદ્યૈઃ પ્રયત્નતઃ ।
સતતં શિવપૂજાયાં ચિત્તં યસ્યાનુવર્તતે ॥ ૪૩૯॥

સ ધન્ય ઇતિ વિજ્ઞેયસ્તેન મુક્તિરવાપ્યતે ।
શિવપૂજાપિ કર્તવ્યા શિવલિઙ્ગે નિરન્તરમ્ ॥ ૪૪૦॥

શિવલિઙ્ગે કૃતા પૂજા સર્વકામપ્રદાયિકા ।
યે પૂજયન્તિ સતતં શિવલિઙ્ગં શિવાત્મકમ્ ॥ ૪૪૧॥

ન તેષાં ગર્ભવાસાદિદુઃખાનિ દ્વિજપુઙ્ગવાઃ ।
શિવનામામૃતં યેન પીતં યેન મુદા મુહુઃ ॥ ૪૪૨॥

નૈવ પાસ્યત્યસૌ માતુઃ પુનઃ સ્તન્યમિતઃ પરમ્ ।
શિવનામામૃતે પીતે જન્મૈવ ન ભવિષ્યતિ ॥ ૪૪૩॥

એવં ચેત્સ્તન્યપાનં તુ દુર્લભં હ્યસ્ય સર્વથા ॥ ૪૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વેદપુરુષપ્રોક્તં શિવલિઙ્ગાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૪। ૪૨૦-૪૪૪॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 24 . 420-444..

Proofread by Ruma Dewan

---

*Vedapurushaproktam Shivalingarchanopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*